अष्टमः पाठः ८

# मृदपि च चन्दनम्



मृदपि च चन्दनमस्मिन् देशे, ग्रामो ग्रामः सिद्धवनम्।
यत्र च बाला देवीस्वरूपा, बालाः सर्वे श्रीरामाः ।।

हरिमन्दिरमिदमखिलशरीरम्
धनशक्ती जनसेवायै
यत्र च क्रीडायै वनराजः,
धेनुर्माता परमशिवा ।।



नित्यं प्रातः शिवगुणगानं
दीपनुतिः खलु शत्रुपरा।। मृदपि .......... ।।



भाग्यविधायी निजार्जितकर्म
यत्रश्रमः श्रियमर्जयति
त्यागधनानां तपोनिधीनां
गाथां गायति कविवाणी



गङ्गाजलमिव नित्य निर्मलं
ज्ञानं शंसति यतिवाणी।। मृदपि .......... ।।



यत्र हि नैव स्वदेहविमोहः
युद्धरतानां वीराणाम्।
यत्र हि कृषकः कार्यरतः सन्
पश्यति जीवनसाफल्यम्

जीवनलक्ष्यं न हि धनपदवी
यत्र च पर शिवपदसेवा ।। मृदपि।। .................... ।।

(श्री जनार्दन हेगडे)

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| मृदपि | मृत्तिका अपि | मिट्टी भी |
| सिद्धवनम् | तपस्थानम् | तपोभूमि |
| जनसेवायै | लोकसेवायै | लोगों की सेवा |
| क्रीडायै | रमणाय | खेलने के लिए |
| खलु | निश्चयेन | निश्चय से |
| दीपनुतिः | दीपाय नमस्कारः | दीप को नमस्कार |
| शत्रुपरा | शत्रुहितसम्बन्धः | शत्रु के हित सम्बन्धी |
| भाग्यविधायि | भाग्यस्य विधाता | भाग्य का विधाता |
| निजार्जितकर्म | स्व उपार्जितकर्म | स्वयं द्वारा अर्जित कर्म |
| श्रियमर्जयति | धनमर्जयति | धन कमाता है। |
| शंसति | प्रसारयति | फैलाता है। |
| यतिवाणी | मुनिवाक् | मुनियों की वाणी |
| स्वदेहविमोहः | स्वशरीरस्य विशेषमोहः | शरीर का विशेष मोह |
| युद्धरतानां | युद्धे संलग्नानां | युद्ध में लगे हुए का |
| जीवनसाफल्यम् | जीवनस्य समृद्धिः | जीवन की सफलता |
| परशिवपदसेवा | परं लक्ष्यं शिवपादार्चनम् | जीवन का परम लक्ष्य शिव के चरणों की सेवा |
| धनपदवी | धनं पदं च | धन और पद |

## अभ्यासः

### मौखिकप्रश्नाः

१. **शब्दानाम् उच्चारणं कुरुत –**

| | | | |
|---|---|---|---|
| मृदपि, | सिद्धवनम्, | देवीस्वरूपाः, | दीपनुतिः, |
| भाग्यविधायि, | निजार्जितकर्म, | श्रियम् शंसति, | स्वदेहविमोहः, |
| कृषकः, | जीवनसाफल्यम्, | युद्धरतानाम्, | धनपदवी । |

२. **प्रश्नानाम् उत्तराणि वदत -**

(क) मृदपि कीदृशम् अस्ति ?

(ख) सर्वे बालाः कस्य रूपे सन्ति ?

(ग) कविवाणी केषां गाथां गायति ?

(घ) प्रातः कस्य गुणगानं भवति ?

(ङ) गङ्गाजलं कीदृशं वर्तते ?

## लिखितप्रश्नाः

१. **अधोलिखितानां प्रश्नानाम् उत्तराणि एक पदेन लिखत -**

(क) सिद्धवनं किम् अस्ति?

(ख) देवीस्वरूपाः काः सन्ति ?

(ग) कस्य विमोहः नास्ति ?

(घ) यतिवाणी किं करोति ?

(ङ) जीवनलक्ष्यं किम् अस्ति ?

२. **रिक्तस्थानानि पूरयत -**

(क) हरिमन्दिरम् .......................... शरीरम् ।

(ख) यत्र च .............................. वनराजः ।

(ग) दीपनुतिः ........................... शत्रुपरा ।

(घ) यत्रहि ................................... सन् ।

(ङ) यत्र श्रमः ......................... अर्जयति ।

३. **उदाहरणम् अनुसृत्य शब्दं, धातुरूपम् अव्ययं च पृथक् कृत्वा लिखत -**

(अपि, ग्रामः, धेनुः, गायति, कृषकः, यत्र, शंसति, च, न, हि, वनराजः, प्रातः, खलु, अर्जयति, नित्यम्, इव)

| | शब्दरूपं | धातुरूपम् | अव्ययम् |
|---|---|---|---|
| उदाहरणम् - | धेनुः | अर्जयति | च |
| | ............ | ............ | ............ |
| | ............ | ............ | ............ |
| | ............ | ............ | ............ |
| | ............ | ............ | ............ |
| | ............ | ............ | ............ |

४. निम्नाङ्कितशब्दानां सन्धि-विच्छेदं कुरुत-

| शब्दः | | सन्धि-विच्छेदं |
| --- | --- | --- |
| नैव | - | ............. + .............. |
| धेनुर्माता | - | ............ + ............... |
| निजार्जित | - | ............ + ............... |

५. अर्ज्, गी एवं शंस् धातूनाम् रूपाणि लट्लकारे लिखतु -

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- | --- |
| प्रथमः पुरुषः | अर्जयति | अर्जयतः | अर्जयन्ति |
| मध्यमः पुरुषः | ................ | अर्जयथः | ................ |
| उत्तमः पुरुषः | ................ | ................ | अर्जयामः |

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- | --- |
| प्रथमः पुरुषः | गायति | गायतः | ................ |
| मध्यमः पुरुषः | गायसि | ................ | ................ |
| उत्तमः पुरुषः | ................ | गायावः | ................ |

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- | --- |
| प्रथमः पुरुषः | ................ | शंसतः | शंसन्ति |
| मध्यमः पुरुषः | शंससि | ................ | ................ |
| उत्तमः पुरुषः | शंसामि | ................ | ................ |

## योग्यता-विस्तारः

**कविपरिचयः** - प्रसिद्धदेशभक्तिगीतस्य रचनाकारः लब्धप्रतिष्ठः गीतकारः जनार्दन हेगडे बेंगलुरूतः प्रकाशितायाः मासिकपत्रिकायाः सम्भाषणसन्देशस्य सम्पादकः वर्तते। कविनानेन एतादृषाणि बहूनि गीतानि रचितानि। समभावी अन्यभाषाणां गीतानां स्मरणं कुरुत -

**यथा** - (१) चन्दन है इस देश की माटी।
तपो भूमि हर ग्राम है।
हर बाला देवी की प्रतिमा
बच्चा बच्चा राम है।

(२) आओ बच्चों तुम्हें दिखाये झांकी हिन्दुस्तान की
इस मिट्टी से तिलक करो यह धरती है बलिदान की
वन्दे मातरम् .....

( गीतम् )

## नैव क्लिष्टा न च कठिना

सुरस सुबोधा विश्व मनोज्ञा
ललिता हृद्या रमणीया।
अमृतवाणी संस्कृत भाषा
नैव क्लिष्टा न च कठिना।

कविकोकिल-वाल्मीकि-विरचिता
रामायणरमणीयकथा।
अतीव-सरला मधुरमञ्जुला
नैव क्लिष्टा न च कठिना ।।
सुरस ................................ ।।

व्यासविरचिता गणेशलिखिता
महाभारते पुण्यकथा।
कौरव-पाण्डव-सङ्गरमथिता
नैव क्लिष्टा न च कठिना ।।
सुरस ................................ ।।

कुरूक्षेत्र - समराङ्गण - गीता
विश्ववन्दिता भगवद्गीता।
अमृतमधुरा कर्मदीपिका
नैव क्लिष्टा न च कठिना ।।
सुरस ................................ ।।

कविकुलगुरू-नव रसोन्मेषजा
ऋतु-रघु-कुमार-कविता।
विक्रम-शाकुन्तल-मालविका
नैव क्लिष्टा न च कठिना ।।
सुरस ................................ ।।